# संस्कृत-वार्ता:

**दिनाङ्क :-12.08.2024** **प्रात: - 06:55**

## अथ वार्ता:

**प्रधानमन्त्री-कृषि**

प्रधानमन्त्रिणा नरेन्द्र-मोदिना ह्यः नव दिल्लीस्थे भारत-कृषि अनुसन्धान-संस्थाने जलवायुसमेकित उत्पादाधारितानां सस्यानां नवोत्तरैकशत प्रकारकाणि सस्यबीजानि प्रख्यापितानि । एतेषु नवोत्तरैकशतबीजेषु चतुस्त्रिंशत् क्षेत्रीय-शस्यानि , सप्तविंशतिः उद्यानशस्यानि समेत्य अन्य शस्यबीजानि सम्मिलितानि सन्ति। एतदतिरिच्य उद्यानशस्येषु फलानि, शाकानि , पुष्पाणि औषधीय-पादपाः च सम्मिलिताः सन्ति। एतेषु विषयेषु कृषक-वैज्ञानिकैः सह परिचर्चां कुर्वन् प्रधानमन्त्री कृषि क्षेत्रेषु अपि मूल्यवर्धनस्य महत्त्वं सबलं प्रतिपादितवान्। कृषकैः प्रतिपादितं यत् एतानि नवीनानि शस्योत्पादकानि बीजानि अत्यधिकानि लाभप्रदानानि भविष्यन्ति। यतोहि एतानि बीजानि तेषां कृषि-व्ययं न्यूनीकरणं करिष्यन्ति। सममेव पर्यावरणस्य अपि संरक्षणं करिष्यन्ति। असौ प्राकृतिक-कृषेः लाभानि समेत्य जैविक-कृषिं प्रति जनानां संवर्धित-विश्वासस्य विषये अपि परिचर्चां विहितवान्। असौ प्रोक्तवान् यत् जनाः जैविक-खाद्य-पदार्थानाम् उपभोगस्य याचनां कुर्वन्ति। कृषकैः प्राकृतिक-कृषिमाधृत्य प्रशासनद्वारा विहितानां पदक्षेपानां प्रशंसां अपि कृता। प्रधानमन्त्री परामर्शं यच्छन् प्रोक्तवान् यत् कृषि विज्ञान केन्द्र द्वारा कृषकेभ्यः प्रत्येकं मासे सक्रियरूपेण तेषां लाभानां विषये जागरुकं कर्तुं च सूचना दातव्या।

**भारतीय-प्रतिभूति-विनिमय**

अमेरिका-देशस्थिताया: शॉर्ट सेलर हिण्डन्बर्ग्-रिसर्च- इत्यस्याः संस्थायाः आरोपानाम् खण्डनं भारतीय-प्रतिभूति-विनिमय-मण्डलेन कृतम् अस्ति। देशस्य अनेन अंशा अंशापणनियामकेन हितविग्रहसम्बद्धानां विषयाणां निवारणाय पर्याप्तानि आन्तरिकतन्त्राणि सन्ति इति

सूचितम्, येषु प्रकटीकरणरूपरेखा, अस्वीकारस्य प्रावधानं च अन्तर्भवत: । तत्र इदमपि उल्लिखितं वर्तते यत् प्रतिभूति-धारणानां, तेषां च स्थानान्तरणस्य च दृष्ट्या आवश्यकाः प्रासंगिकाः प्रकटीकरणाः अध्यक्षेण यथासमयं कृताः सन्ति। मण्डलेन इदं अपि प्रकाशितं यत् अध्यक्षः सम्भाव्यहितविग्रहसम्बद्धेभ्य: विषयेभ्य: अपि स्वयमेव निवृत्तः अस्ति।

सेबी इत्यनेन निवेशका: निवेदिता: यत्ते एतादृशानां प्रतिवेदनानां प्रतिक्रियां दातुं पूर्वं शान्तमनसा यथायोग्यं परिश्रमं कुर्वन्तु इति।

**जयशंकर**

विदेशमन्त्रिणा डॉ. सुब्रह्मण्यम जयशंकरेण प्रतिपादितं यत् भारत-मालदीवयो: च सहकार्यं पारम्परिकभूमिकाया: परं याति यत: मालदीव: हिन्दमहासागरक्षेत्रस्य प्रमुख: भाग: अस्ति। मालदीवदेशे अड्डू-पुनर्प्राप्ति-परियोजनाया: अड्डू-तट-संरक्षण-

परियोजनाया: च उद्घाटनं कुर्वन् डॉ् जयशंकर: अवोचत् यत् अस्माकं विकाससहकार्यस्य उद्देश्यं मालदीवदेशस्य जनानां जीवनस्य सर्वान् पक्षान् ज्ञातुं, तेभ्य लाभान् दातुं च उपायान् अन्वेष्टुं वर्तते।

## नीट पीजी

रविवासरे देशस्य सप्तत्यधिकैक शतं यावत् नगरेषु चतुर्विंशत्याधिक द्विसहस्रतम वर्षस्य नीट पीजी परीक्षा सफलतया सम्पन्ना। चिकित्साविज्ञानस्य राष्ट्रियपरीक्षामण्डलेन उक्तं यत् अस्मिन् वर्षे अभ्यर्थिभ्यः प्रायः चत्वारिंशत्यधिक-पञ्चशतोत्तर-अष्टविंशतिः-सहस्राधिक-द्विलक्षं यावत् प्रवेशपत्राणि प्रसारितानी।

**।।इति वार्ता:।।**